॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥
१२. द्वादशः सर्गः

अत्रानंतस्वांतवेदांतिसिंहे मुख्यव्याख्यानिस्वने जृंभमाणे ।
सद्यो माद्यद्वादिदंतींद्रभीमे भेजे क्षोभो मायिगोमायुयूथैः ॥ १२.१ ॥

संभूयामी चोळजद्वीपिपुर्योः पार्श्वे पापा मंत्रयामासुरुग्राः ।
सासूया भूभूषणे वायुदेवे मूढा यद्वद् धार्तराष्ट्रांतिके प्राक् ॥ १२.२ ॥

सन्मात्सर्यं बद्धुमूचेऽशुभानां वाचाऽलोलं कोपि गां धारकस्य ।
मध्ये तेषां नीचनीत्या समानो वाचालोऽलं कोऽपि गांधारकस्य ॥ १२.३ ॥

एकं तत्वं वष्टि मायामयीयं वाक्यैः प्राच्यैरप्यवाच्यं विधत्ते ।
पूर्वाऽपूर्वा हंत दौर्घट्यभूषा चित्रंचित्रं दर्शनाचार्यनीतिः ॥ १२.४ ॥

मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं विश्वं दृश्यं विप्रचंडालपूर्वम् ।
भेदापेतं भेदिमानैः समानैः साधीयः कः साधयेत् तामलब्ध्वा ॥ १२.५ ॥

सत्यं सत्यं व्यावहार्यं विधत्ते सर्वं मोहे सर्वनिर्वाहिणी सा ।
ज्ञाने जाते दग्धवस्त्रप्रतीतं पक्के तस्मिंस्तप्तलोहात्तवार्वत् ॥ १२.६ ॥

ज्ञानिश्रेष्ठश्रेष्ठ विज्ञानिवर्गे नैर्गुण्यस्थे सांप्रतं नाथभूताः ।
आक्रंदं मे हंत शृण्वंतु सोऽयं हाहा मायावाद उत्सादमेति ॥ १२.७ ॥

भ्रष्टा भाट्टा न प्रभाकृत्प्रभाऽभूत् त्रस्ता माहायानिकाद्याश्च यत्र ।
दुर्गं मायावादसत्रं दिधक्षुः नोपेक्ष्या नस्तत्त्ववादाग्निजिह्वा ॥ १२.८ ॥

यं यं प्रापद् भूरिचित्तः प्रदेशं तस्मात्तस्मादागतेरंतरायः ।
प्रत्यज्ञायि व्यक्तमार्येण सोऽपि प्राप्नोत् पार्श्वं हि वयं भाग्यहीनाः ॥ १२.९ ॥

प्रश्नः पृष्टः खंड्यते तेन नूनं युक्तां युक्तिं वक्ति चासावखंड्याम् ।
वादिव्रातं लज्जयेन्नो विशेषाद् आक्षेप्तेति श्रूयते किं नु कुर्मः ॥ १२.१० ॥

प्राच्यं शास्त्रं यत् सपादं तु लक्षं वाक्यैनैकेनाक्षिपद्धर्ष तीर्थः ।
इत्थं पांथैर्वर्णीतं शृण्वतः प्राग् युष्मान् प्रापद् दूयमानं मनो मे ॥ १२.११ ॥

वेदव्यासो न्वेष वेदो नु मूर्तो दिव्या मूर्तिर्यस्य सा सुस्मितस्य ।
तद्द्रश्ट्टृणां चेति वाणी कृपाणी नूनं मायापक्षमूलं छिनत्ति ॥ १२.१२ ॥

अक्लिष्टं तत्सूत्रभाष्यं बलीयो मानोपेतं का क्षतिर्नस्तथा चेत् ।
आस्माकाः केऽप्येवमुक्त्वा विलज्जाः लज्जासिंधौ दुस्सहेऽमज्जयन्नः ॥ १२.१३ ॥

तस्य व्याप्तैः शिष्यजालैस्तु गौणैः संसत्सिंधौ शंखचक्रादिभृद्भिः ।
मा गृह्येरन् विश्वसत्त्वांतराणि क्षेमाप्त्यै नस्तत्र नीतिं विधत्त ॥ १२.१४ ॥

गौणैस्तर्कैर्गौणवाक्याभिगुप्तैः गौणीं बुद्धिं वर्धयंते नृणां ते ।
हंसानां नो वाग्विघातप्रवीणाः सिंधुं भूयोवारिवर्षैरिवाब्दाः ॥ १२.१५ ॥

बाहुल्येन ह्येतदुक्त्वा खलु द्राग् ऐते विश्वं प्राप्नुवंति प्रकामम् ।
अस्मिन्नस्मद्दर्शनापायकाले यद्वल्लोकापायकाले लयापः ॥ १२.१६ ॥

आकर्ण्येत्थं तस्य वाणीमथान्यो मानी तेषां मानिनां चित्तवेत्ता ।
स्वानां चेतो नंदयन् मंदचेताः धृष्टामुच्चैर्वाचमाचष्ट कष्टः ॥ १२.१७ ॥

तेजः शंकामात्रतो यद् विलीनं धिग् भीरूणां मानसं मानहीनम् ।
ऐकांतेन प्राप्ततेजोविलीनं स्थेयो यस्माद् भाति हैयंगवीनम् ॥ १२.१८ ॥

येषां विद्यां शांकरी शंकरी नो देवादीनां बाध्यतां साधयंती ।
शौक्रीवालं लज्जयेद् देवपूज्यं तेषामेषां सन्निधौ को विषादः ॥ १२.१९ ॥

यद्यद्वैतं कर्कशैर्गौणतर्कैः रुद्धं साध्यं नैव भात्यस्तु तावत् ।
षट्कर्मज्ञैर्दिव्यमंत्रौषधाढ्यैः ऐतैर्गुप्तान् नो विजेता हि कश्चित् ॥ १२.२० ॥

यद्यप्येवं न ह्युपेक्ष्यो विपक्षः किंतु प्राप्तो नाधुनाऽऽक्रंदकालः ।
अप्यद्वंद्वस्वात्मबोधप्रतीतैः आचार्यैर्यच्छंक्यते शंकराद्यैः ॥ १२.२१ ॥

पारंपर्येणाऽगतं तत्त्वशास्त्रं हंतोत्सन्नं नूतनेनेत्युदीर्य ।
तेषां दोषा वर्णनीया विदग्धैः संतोऽसंतो वाऽपि मध्यस्थलोके ॥ १२.२२ ॥

स्वाभिप्रायो ब्रह्मवत् स्यादवाच्यो मायाशक्त्या सर्वनिर्वाहसिद्धिः ।
इत्थं नीत्या शास्त्रनीत्येव बाध्यः सर्वो लोकः स्वात्मनो यः परः स्यात् ॥ १२.२३ ॥

ग्रामेग्रामे वार्यतां माननैषां पूर्वंपूर्वं सामपूर्वैरुपायैः ।
संप्राप्तानां मानभंगाय कार्यं ग्रंथाकर्षाद्युद्यतैरस्मदीयैः ॥ १२.२४ ॥

इत्याद्येते कार्यमालोच्य काले
चक्रुर्वक्राश्चक्रिभक्तप्रतीपम् ।
योग्या मंक्तुं तेऽन्यथा स्युः कथं वा
दुःखोग्रांभस्यंधतामिस्रसिंधौ ॥ १२.२५ ॥

व्रत्याकारंवासुदेवद्विषं ते प्राज्ञं मन्यं पुंडरीकाभिधानम् ।
वादव्याजाक्षेपकामाः कुमंत्रात् चक्रुर्यत्तं रूप्यपीठालयेऽमी ॥ १२.२६ ॥

यद्वत् सिंहं ग्रामसिंहोऽशुचीच्छो हंसं काको यद्वदेवैकदृष्टिः ।
यद्वन्मायी भूरिमायस्तरक्षुं तद्वद् विद्वद्वर्यमाह्वास्त मूढः ॥ १२.२७ ॥

अप्यल्पोऽसौ न ह्युपेक्षांबभूवे लोलात्मेवादक्षपक्षः पतंगः ।
मध्वेनाहो दुस्तरेण स्वभावात् तेजोराजीराजितेनाग्निनेव ॥ १२.२८ ॥

मानैर्मान्यैर्भासमानोऽसमानैः आक्षिप्यैनं स्वं मतं साधयित्वा ।

प्रीत्यै विष्णोरुत्तमप्रीतितीर्थो वेदव्याख्यां वेदवेदी चकार ॥ १२.२९ ॥

आम्नायं ये पेठुराम्नायपूर्वं प्राप्ता विप्रास्तत्र कौतूहलेन ।
पर्यासीनास्तावदाचार्यवर्यं प्रेक्ष्यं प्रेक्षांचक्रिरेऽनेकसंख्याः ।१२.३० ॥

उक्तांगेभ्यः कादिकान् व्यंजयंतं तत्तन्मात्राव्यंजनादौ प्रवीणम् ।
तिस्रोऽवस्थास्तद्गुणैर्भावयंतं देवा दृष्ट्वा ह्यस्मरन् देवदेवम् ॥ १२.३१ ॥

आदौ ह्रस्वत्वेन वत्सानुसृत्यां मात्रापादौ वर्तयन् दृश्यमानः ।
कुर्वन्नन्याश्चाग्र्यरूपा विवृत्तीः गोविंदश्रीरास गोविंदभक्तः ॥ १२.३२ ॥

मांगल्यांगव्यक्तभावा त्रिलोकीं रंगारूढा विस्मयं प्रापयंती ।
कृष्णेवान्या मान्यविन्यासपादा रेजे माध्वी सुस्वरा वेदवाणी ॥ १२.३३ ॥

गांभीर्याद्यैर्युक्तमौदार्यकार्यैः
नानानादश्लाघ्यमुच्चारणं तत् ।
शीक्षाशिक्षालक्षणानां हि लक्ष्यं
मान्यं मन्ये धन्यबुद्धेरतुल्यम् ॥ १२.३४ ॥

काल्पीः क्लृप्तीर्व्यंजयन् छांदसीश्च व्यक्तं शाब्दं शास्त्रमुद्भाव्य भूयः ।
स व्याचख्यावुक्तनैरुक्तमार्गो ज्यायान् ज्योतिर्विदिनां वेदमित्थम् ॥ १२.३५ ॥

श्रौते व्याख्योच्चारणे चारुणी ते मादृग्देही वर्णयेदस्य को नु ।
वागीशानैर्वाग्विहंगेंद्रजीवैः भूर्याश्चर्यैर्वर्णिते ये प्रणम्य ॥ १२.३६ ॥

छंदस्सार्थं सार्थमत्रामुनेत्थं प्रोक्तं श्रुत्वा ब्राह्मणा ब्रह्मणेव ।
सर्वे सौम्या जिष्णुजिज्ञासयाऽमी प्राप्य प्रोचुश्चित्रकायाभिधानम् ॥ १२.३७ ॥

प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ हंतावोचन्मंत्रवर्णाभिधेयम् ।
तत्प्रत्यर्थी प्रार्थ्यते वक्तुमेतत् प्राज्ञास्माभिः श्रोतुकामैर्भवांश्च ॥ १२.३८ ॥

इत्युक्तस्तैरेष विस्तारिबुद्धेः प्राप्तुं साम्यं संप्रवृत्तो दुरात्मा ।
हास्योऽत्राभूद् वासुदेवप्रभार्थी यद्वत् पूर्वं पौंड्रको वासुदेवः ॥ १२.३९ ॥

आङादेशादुत्तरं रादिशब्दं श्रुत्वा नारेत्युक्तवंतं पदं तम् ।
व्याख्यालौल्यादैतरेयादिसूक्ते पृथ्वीदेवा निंदनीयं निनिंदुः ॥ १२.४० ॥

शार्दूलाख्यां प्राप्य संभावितः प्राग् लोके धूर्तो मायिगोमायुरेषः ।
वादिद्वीपिध्वंसिनं मध्वसिंहं प्राप्तो हीत्थं शब्दशेषो बभूव ॥ १२.४१ ॥

कृष्णाभीष्टा शास्त्रविस्पष्ट संज्ञा या स्वीया श्रीः पालिता सद्द्विजेन ।
पद्माख्यासत्सैंधवेनाऽहृतां तां शुश्रावाग्र्यानंदतीर्थाख्यपार्थः ॥ १२.४२ ॥

तूर्णं तीर्णादभ्रमार्गोऽथ सार्यः संप्राप्तोऽसौ गोगणैर्भीषयित्वा ।
संयम्यांतर्यंतृकामेन हास्यं संप्राप्तश्रीर्निर्जितं तं जहास ॥ १२.४३ ॥

दुष्टात्माऽसौ भद्रमेकाकिनं यः क्षेप्तुं हेतुः सौख्यदाख्यं बभूव ।
हर्यंशोऽयं तं न चक्षाम भूयः तोके सन्ने सूकरं केसरीव ॥ १२.४४ ॥

तस्य त्रासात् पृष्ठतस्तिष्ठतोऽभूत् क्षेमापेक्षी यो जनः प्राग् जितोऽपि ।
मध्येऽन्येषां गोततीस्तत्प्रयुक्ताः सोऽद्यज्जिष्णुः पंचषैर्गोविशेषैः ॥ १२.४५ ॥

विष्णोर्भूयः शोभयद्भिः पदांतं पारंपर्येणेर्यमाणैरवार्यैः ।
गोव्रातैस्तं दारयित्वा न्यगृह्णात् कंजाख्यानं सिंधुपं मध्वपार्थः ॥ १२.४६ ॥

आस्तामास्तामेष वो विश्वमोषो रेरे मायावादिचोरा द्रवेत ।
द्रष्टाद्रष्टा निग्रहीता ध्रुवं वः प्राप्तः कालो द्राग् गुहांतं प्रवेष्टुम् ॥ १२.४७ ॥

तेजो विद्वच्चक्रचंद्रस्य लीनं विध्वस्ताऽलं वादिनक्षत्रलक्ष्मीः ।
विश्वव्याप्तं यत् तु तद्दीप्तिमूलं युष्मत्प्रेष्ठं तन्निरस्तं तमश्च ॥ १२.४८ ॥

पूर्वाशामापूर्य विश्वप्रकाशी गोसंदोहैः सप्तविद्याख्यवाहः ।

युष्माभिः किं नैक्षि देदीप्यतेऽसौ देवः साक्षात् सर्ववित्सर्वदीपः ॥ १२.४९ ॥

सर्वाधारं ब्रह्मसंज्ञं विहायो रम्याकारं शारदेंदीवराभम् ।
सन्निर्णीतं गुण्यलं शब्दभेदैः मध्वादित्यं संश्रितं कोऽपिधत्ते ॥ १२.५० ॥

विधावतविधावत त्वरितमत्रिवादासुरा–
अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते ।
स युक्तिनखरैः खरैर्मुखरमूर्खदुःखांकुरैः विदारयति दारुणप्रवचनप्रणादोऽप्रियान् ॥
१२.५१ ॥

धत्ते रूपाण्यनंतान्यपि भुवनपते र्यो हृदाऽप्येक पक्षो दक्षः
सद्भ्योऽखिलेभ्योऽप्यमृतमिह ददौ केवलं यो न मात्रे ।
पक्षिश्रेष्ठोऽपरः सन्नमितमतिपदोऽसंपदे स्यादयं वो मा

दर्पं मायिसर्पा भजतभजत तास्ता गुहा द्राग् द्विजिह्वाः ॥ १२.५२ ॥

वेदव्रातसुदर्शनः परिलसत्तर्काख्यशंखध्वनिः
विभ्राजिष्णुपुराण संहतिगदः श्लोकौघशार्ङ्गान्वितः ।
सत्सूत्रेष्वितिहासनंदकचणो मध्वाख्यनारायणः
प्राप्तो वो निजिघृक्षया द्रवत हे मायाविदेवद्विषः ॥ १२.५३ ॥

इति निगदति मायावादिविद्वेष वेषे
शुभजननिकरे स्वारामतोऽस्मात् प्रयातः।
न्यवसदमरधिष्ण्ये प्राग्रवाटाभिधाने
गुरुमतिरभिनंदन् देवमानंदमूर्तिम् ॥ १२.५४ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते द्वादशः सर्गः ॥